NAME-----------------
ROLL NO-------------

## ANNUAL EXAMINATION 2017-18

Subject- sanskrit
class - VIII
Time- 3 hours !

Maximum Marks: 80

निर्देशाः-

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

खण्डः (क) अपठित-अवबोधनम् - 10 अंकाः

खण्डः (ख) रचनात्मकं कार्यम् - 15 अंकाः

खण्डः (ग) अनुप्रयुक्त - व्याकरणम् - 25 अंकाः

खण्डः (घ) पठित - अवबोधनम् - 30 अंकाः

(ii) सर्वे प्रश्नाः अनिवार्याः ।

(III) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रश्नसंख्या अवश्यं लेखनीया ।

(VI) उत्तराणि संस्कृतेन एव लेखनीयानि ।

खण्डः - क 10 अंकाः

1. अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

भारतस्य राजधानी दिल्ली नाम्ना प्रसिद्धा अस्ति । अस्याः प्राचीनं नाम इन्द्रप्रस्थं अस्ति । 'नवा दिल्ली' इति स्थाने केन्द्रीयप्रशासनस्य कार्यालयाः सन्ति यत्र बहुभूमिकानि भवनानि सन्ति । भारतस्य राष्ट्रपतिः , उपराष्ट्रपतिः , प्रधानमन्त्री , अन्ये केन्द्रियमन्त्रिणः सांसदाः च दिल्लीनगरे एव निवसन्ति ।

दिल्ली सर्वस्य आकर्षणकेन्द्रम् अस्ति । अत्र दूरदर्शनस्य अपि केन्द्रम् अस्ति । अधुना संसारे या प्रगतिः दृश्यते तस्याः दिग्दर्शनं दिल्लीनगरे भवति ।दिल्ली शिक्षायाः अपि प्रमुखं केन्द्रं वर्तते । अत्र दिल्लीविश्वविद्यालयः , जवाहरलालनेहरुविश्वविद्यालयः केन्द्रीय संस्कृत-विद्यापीठः च सन्ति ।

दिल्लीनगर्यां दर्शनीयस्थानेषु सर्वोच्चन्यायालयः , मेहरौलीस्तम्भः , राष्ट्रपतिभवनम् , संसदभवनम् , अद्भुतालयः . जन्तुग्रहं , वायुयान-आस्थानं अन्तर्राज्यीय-बस-आस्थानं



https://www.evidyarthi.in

रक्तदुर्गं च सन्ति ।

किम् बहुना दिल्लीभारतस्य हृदयं वर्तते ।

1. एकपदेन उत्तरत- 2

(i) भारतस्य राजधानी का अस्ति ?

(ii) दिल्लीनगरस्य प्राचीनं नाम किम् अस्ति ?

2. पूर्णवाक्येन उत्तरत - 4

(i) दिल्ली कस्याः प्रमुखं केन्द्रं वर्तते ? तेषाम् नामानि लिखत ।

(ii) दिल्लीनगर्यां प्रसिद्ध -दर्शनीयस्थानानि के के सन्ति ?

3. निर्देशानुसारेण उत्तरत - 2

(i) 'दिल्ली शिक्षायाः अपि प्रमुखं केन्द्रम् अस्ति' अत्र अव्ययपदं किम् ?

दिल्ली / शिक्षायाः / अपि

(ii) 'उन्नतिः' पदस्य कः पर्यायः अत्र प्रयुक्तः

(iii) 'केन्द्रम्'- अस्य विशेषणपदम् किम् ?

प्रमुखः / प्रमुखा / प्रमुखम्

(iv) 'सन्ति' पदे कः धातुः ?

4.कथायाः कृते उपयुक्तं शीर्षकं लिखत । 2


## खण्डः -ख 15 अंकाः

**2.**रिक्थस्थानेषु मंजूषायाः उचितं पदं चित्वा पूरयत - **5**

मंजूषा- अन्ये, आम्रवृक्षस्य, फलिष्यति, फलानि, व्यर्थम्

नगरक्षकः एकदा-----**1**-----आरोपणे तल्लीनम् एकं वृद्धम् अपश्यत् । सः अपृच्छत् "त्वं किमर्थम्----**2**----परिश्रमं करोषि ? यदा वृक्षाः --**3**----- तदा त्वं जीवितः न भविष्यसि ।" वृद्धः हसित्वा अवदत्- रक्षक महोदय ! त्वं यानि---**4**------खादसि तेषां व्रक्षाः त्वया न आरोपिताः । इत्थं मम वृक्षस्य फलानि अपि -----**5**----खादिष्यन्ति ।

**3.** चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेव लिखत - **10**





https://www.evidyarthi.in

| |
|---|
| पाठयति, छात्रः, पृच्छति, छात्राः, अध्यापकः, प्रश्नम्, ध्यानेन, आकर्णयन्ति |

खण्डः- ग 25 अंकाः

4. उचित विभक्ति पदैः वाक्यानि ~~वाक्यानि~~ पूरयत - 4

(i) ----------कार्यालये अवकाशः भवति ।

रविवासरम् / रविवासरे

(ii) मातामही-----------अन्नं यच्छति ।

याचकाय / याचकम्

(iii) सुवीरः ----------वदति ।

मित्रम् / मित्रेण

(iv) गंगा-----------निर्गच्छति ।

हिमालयात्/हिमालयेन

(v) एतत्-----------पुस्तकम् अस्ति ।

मनोरंजका/मनोरंजकम्

(vi) वयम्---------गणितम् पठामः ।

आचार्येण / आचार्यात्

(vii) -----------विना विद्यालाभं न भवति ।

परिश्रमम् / परिश्रमस्य

(viii) -----------एव मैत्री करणीया ।

समशीलम्/ समशीलेषु

5.उचित क्रिया- पदैः वाक्यानि पूरयत - 4

(i) श्वः अहम् पुस्तकमेलकम्---------।

अगच्छम् / गमिष्यामि / गच्छामि

(ii) ह्यः तव कार्यालये किम्------------?

अभवत्/भविष्यति/अस्ति

(iii) किम् आवाम् जलं-------------?



evidyarthi
https://www.evidyarthi.in

पिबाव/पिबाम्/पिबानि

(iv) ते प्रतिदिनम् सायम् --------।

क्रीडसि / क्रीडन्ति / क्रीडति

**6. उचित अव्यय-पदैः वाक्यानि पूरयत -** 4

मंजूषा- उपरि, बहिः , अपि , अधः, पुरा, तत्र, कुत्र, अधुना

1. पुत्र , गच्छ , देवालयात्-------क्रीड ।
2. ग्रामीणः तरोः--------विश्रामम् कुर्वन्ति ।
3. भवनस्य---------ध्वजः अस्ति ।
4. अहम् ---------आम्रम् खादिष्यामि ।
5. यूयम्---------खेलथ।
6. अरुणः कारयानेन---------गच्छति ?
7. ------------मगधदेशे अशोकः नाम्ना राजा अभवत् ।
8. अहम् --------दूरभाषेण वार्तालापं करोमि ।

**7. सन्धि अथवा सन्धिच्छेदं कुरुत -** 3

(i) परीक्षा (ii) कुत्र+अपि (iii) प्रजानुरागी (iv) सर्व+उत्तमः

(v) अद्यापि (vi) तथा+अपि

**8. प्रकृति-प्रत्ययः संयोजनं कुरुत -** 1.5

(i) पठ्+अनीयर् (ii) लिख्+तव्यत् (iii) गम्+तव्यत्

**9. प्रक्रति-प्रत्यय विभागं उचितं पदं चित्वा कुरुत -** 1.5

(i) लेखनीयः अनीयर्/तव्यत्/ल्यप्

(ii) पठितव्य अनीयर्/तव्यत्/ल्यप्

(iii) गमनीय तुमुन्/ल्यप्/अनीयर्

**10. घटिकां दृष्ट्वा दिनचर्यां वर्णयत -** 4

(i) 5:30 पितामहः प्रातः---------वादने भ्रमणाय गच्छति ।

सार्ध पंच/पंच/सपाद पंच

(ii) 7:30 सः-----------वादने प्रातराशं करोति ।

पादोन् सप्त/सपाद सप्त/सार्ध सप्त

(iii) 3:45 सः ----------वादने वेदपाठं करोति ।

पादोन् त्रि/पादोन् चतुर्/सपाद त्रि

(iv) 8:00 सः रात्रौ-----------वादने ईश्वर-वन्दनां करोति ।

षड्/अष्ट/सप्त

**11. उचित संख्यापदैः वाक्यानि पूरयत -** 3



https://www.evidyarthi.in

(i) देवालये ईश्वरस्य----------प्रतिमा अस्ति ।

एकः/एका/एकम्

(ii) मम----------मित्राणि एव आगच्छन्ति ।

चत्वारः/चतस्त्रः/चत्वारि

(iii) वर्षे---------मासाः भवन्ति ।

द्वादश/द्वादशाः/द्वादशं

खण्डः घ 30 अंकाः

**12. अधोलिखित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** 5

पुरा कश्चन् सुदामा अति दरिद्र परं धार्मिकः विप्रः आसीत् । सः श्रीकृष्णस्य परमः सखा भक्तश्च आसीत् । सः परिवारेण सह अत्यन्तदारिद्रयात् जीवनम् अयापयत् । एकदा धनहीना संत्रस्त्रा तस्य भार्या अवदत्-"विप्र ! साक्षात् श्रीपतिः श्रीकृष्णः तव सखा । तत् कथं भवान् तं किंचित् धनं न याचते । सः अवश्यमेव अस्माकं दारिद्रय् पीडितं कुटुम्बं दृष्ट्वा प्रचुरं धनं दास्यति । अत्र न संशयः ।" सुदामा पत्नयाः अनुरोधेन द्वारिकाम् प्रति अचलत् ।

**प्रश्नाः -**

1 **एकपदेन उत्तरत -** 1

1. दरिद्रः विप्रः कः आसीत् ?

2. विप्रस्य परमं मित्रं कः आसीत् ?

**पूर्णवाक्येन उत्तरत -** 2

1 भार्या विप्रं किम् अवदत् ?

2 सुदामा कीदृशः ब्राह्मणः आसीत् ?

**निर्देशानुसारेण उत्तरत -** 2

1. धार्मिकः विप्रः - अत्र विशेष्यपदं किम् ?

2. अस्माकं पदे का विभक्तिः ?

3. शत्रुः- इति पदस्य किम् विलोमपदं अत्र प्रयुक्तम् ?

4 "अत्र न संशयः" अत्र अव्ययपदं किम् ?

**13. अधोलिखित नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** 5

मनीषः - आह! मया कथं विस्मृतं । अद्य तु जूनमासस्य पंचमी तारिका पर्यावरण-दिवसःअस्ति ।

प्रत्यूषः - त्वं किम्, अद्य तु सर्वै जनैः वृक्षाः विस्मृताः । जीवनस्य आधारान् एतान् वृक्षान् नराः निजस्वार्थहेतुः कृतन्ति । मानवैः सुखानि उपभोक्तुम् असंख्यानि साधनानि



https://www.evidyarthi.in

आविष्कृतानि । अस्मात् कारणात् प्रकृतेः पर्यावरणस्य च द्वयोः एव अवहेलनां कुर्वन्ति ।

मनीषः - त्वं सत्यं वदसि । वृक्षाः परोपकाराय एव फलन्ति । ते स्वयं आतपे स्थित्वा अस्मभ्यं छायां यच्छन्ति ।

प्रत्यूषः - न केवलं छायां अपितु पुष्पाणि, काष्ठानि, औषधानि, गन्धं चापि न जाने किम् किम् यच्छन्ति ।

प्रश्नाः

1. एकपदेन उत्तरत - 2

(i) पर्यावरण-दिवसः कदा मान्यते ?

जुलाईमासे / जूनमासे / सितम्बरमासे

(ii) वृक्षाः किमर्थम् भवन्ति ?

मानवाय / परोपकाराय / पशुभ्यः

(iii) मनीषस्य मित्रम् कः अस्ति ?

राघवः / प्रत्यूषः / मोहनः

(iv) मानवाः कस्य अवहेलनां कुर्वन्ति ?

2. पूर्णवाक्येन - 2.

(i) अद्य जनाः किमर्थं वृक्षान् कृतन्ति ?

(ii) वृक्षाः कथम् जनानाम् सहायतां कुर्वन्ति ?

3. निर्देशानुसारेण उत्तरत- 1

(i) स्थित्वा - अस्मिन् पदे कः प्रत्ययः ?

क्त्वा/ल्यप्

(ii) आतपः इति पदस्य किम् विलोमपदं अत्र प्रयुक्तं ?

**14. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि यच्छत** 5

नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः ।।

प्रश्नाः

1. एकपदेन उत्तरत - 2

(i) आत्मानं कानि न छिन्दन्ति ? पावकः/मारुतः/शस्त्राणि

(ii) पावकः कम् न दहति ? शरीरं/आत्मानं/आपः

2 पूर्णवाक्येन उत्तरत - 2

आत्मानम् काः न क्लेदयन्ति कः च न शोषयति ?

3. निर्देशानुसारेण उत्तरत - 1

(i) 'अनलः' इत्यर्थे अत्र कः शब्दः प्रयुक्तः ?



https://www.evidyarthi.in

मारुतः/पावकः/आपः

(ii) 'शोषयति' इति पदे कः लकारः ?

**15. प्रश्ननिर्माणं कुरुत -** 3

(i) प्रासादे <u>एकः महर्षिः</u> आगच्छत् ।

के/कः/कस्य

(ii) गोवानगरे <u>देवालयाः</u> अपि सन्ति ।

का/के/कः

(iii) सुदामा <u>पत्न्याः</u> अनुरोधेन द्वारिकां प्रति अचलत् ।

कया/काम्/कस्याः

**16. रेखांकित पदानि आधृत्य अशुद्धिसंशोधनं कुरुत -** 3

1. मुनिः तत्र <u>आगत्वा</u> अवदत् । ( आगम्य / आगन्तुम् / आगमनीय)
2. लोभः <u>पापात्</u> कारणम् । (पापस्य / पापम् / पापेन))
3. मूषकः तस्य <u>वचनम्</u> स्वागतं करोति | (वचनात्/वचनस्य/वचनेन)
4. वरं प्राप्य राजा प्रसन्नः <u>अभवन्</u> । ( अभवताम् / अभवत् / भवत)

**17. भिन्नार्थकं पदं चिनुत -** 3

1. नारिकेलम्, पुंगः कदलीफलम्, जलम्
2. महर्षिः,मुनिः,तापसः,गायकः
3. गजः, सिंहः,खगः, वानरः

**18. विपर्ययपदम् चिनुत -** 3

भविष्यम्, निराकारः, दुर्लभम्, मरणम्, सुखम्, आलस्यः

(i) जीवनम्

(ii) दुःखम्

(iii) उद्योगः

(iv) साकारः

(v) सुलभम्

(vi) भूतम्

**19. मेलनं कुरुत -** 3

| क | ख |
|---|---|
| एका | कुप्रथाः |
| अनेकाः | पुरस्कारैः |
| अनेके | विप्रः |
| अनेकैः | तारिका |
| एकः | नारी |
| पंचमी | स्वरूपाः |



evidyarthi
https://www.evidyarthi.in